# .. shrIsubrahmaNya kavacham 2 ..

# ॥ શ્રીસુબ્રહ્મણ્યકવચમ્ ૨ ॥

## Document Information

Text title : subrahmaNya kavacham 2
File name : subrahmaNyakavacham2.itx
Category : kavacha
Location : doc_subrahmanya
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : N.Balasubramanian bbalu at satyam.net.in
Proofread by : N.Balasubramanian bbalu at satyam.net.in
Latest update : January 7, 2009, April 17, 2016
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ શ્રીસુબ્રહ્મણ્યકવચમ્ ૨ ॥

॥ શ્રીરસ્તુ॥

॥ ૐ નમસ્સુબ્રહ્મણ્યાય ॥

॥ અથ સુબ્રહ્મણ્ય કવચમ્ ॥

અસ્ય શ્રી સુબ્રહ્મણ્ય કવચસ્તોત્ર મહામન્ત્રસ્ય
અગસ્ત્યો ભગવાન્ ઋષિઃ, અનુષ્ટુપ્છન્દઃ, શ્રી સુબ્રહ્મણ્યો દેવતા,
સં બીજં, સ્વાહા શક્તિઃ, સઃ કીલકં,
શ્રી સુબ્રહ્મણ્યપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
હિરણ્યશરીરાય અઙ્ગુષ્ઠાભ્યાં નમઃ,
ઇક્ષુ ધનુર્ધરાય તર્જનીભ્યાં નમઃ,
શરવણભવાય મધ્યમાભ્યાં નમઃ,
શિખિવાહનાય અનામિકાભ્યાં નમઃ,
શક્તિહસ્તાય કનિષ્ઠિકાભ્યાં નમઃ,
સકલદુરિત મોચનાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
એવં હૃદયાદિ ન્યાસઃ ।

॥ ધ્યાનમ્ ॥

કનકકુણ્ડલમણ્ડિતષણ્મુખં વનજરાજિત લોચનમ્ ।
નિશિત શસ્ત્રશરાસનધારિણં શરવણોદ્ભવમીશસુતં ભજે ॥
લમિત્યાદિભિઃ પઞ્ચપૂજા ॥
અગસ્ત્ય ઉવાચ ॥
સ્કન્દસ્ય કવચં દિવ્યં નાના રક્ષાકરં પરમ્ ।
પુરા પિનાકિના પ્રોક્તં બ્રહ્મણોઽનન્તશક્તયે ॥ ૧॥

તદહં સમ્પ્રવક્ષ્યામિ ભદ્રં તે શૃણુ નારદ ।
અસ્તિ ગુહ્યં મહાપુણ્યં સર્વપ્રાણિ પ્રિયઙ્કરમ્ ॥ ૨॥

જપમાત્રેણ પાપઘ્નં સર્વકામફલપ્રદમ્ ।
મન્ત્રપ્રાણમિદં જ્ઞેયં સર્વવિદ્યાદિકારકમ્ ॥ ૩॥

સ્કન્દસ્ય કવચં દિવ્યં પઠનાદ્વ્યાધિનાશનમ્ ।
પિશાચ ઘોરભૂતાનાં સ્મરણાદેવ શાન્તિદમ્ ॥ ૪॥

પઠિતં સ્કન્દકવચં શ્રદ્ધયાનન્યચેતસા ।
તેષાં દારિદ્ર્યદુરિતં ન કદાચિદ્ભવિષ્યતિ ॥ ૫॥

ભૂયસ્સામ્રાજ્ય સંસિદ્ધિરન્તે કૈવલ્યમક્ષયમ્ ।

દીર્ઘાયુષ્યં ભવેત્તસ્ય સ્કન્દે ભક્તિશ્ચ જાયતે ॥ ૬॥

શિખાં રક્ષેત્કુમારસ્તુ કાર્તિકેયશ્શિરોઽવતુ ।
લલાટં પાર્વતીસૂનુઃ વિશાકો ભ્રૂયુગં મમ ॥ ૭॥

લોચને ક્રૌઞ્ચભેદી ચ નાસિકાં શિખિવાહનઃ ।
કર્ણદ્વયં શક્તિધરઃ કર્ણમૂલં ષડાનનઃ ॥ ૮॥

ગણ્ડયુગ્મં મહાસેનઃ કપોલૌ તારકાન્તકઃ ।
ઓષ્ઠદ્વયઞ્ચ સેનાનીઃ રસનાં શિખિવાહનઃ ॥ ૯॥

તાલૂ કલાનિધિઃ પાતુ દન્તાઞ્ચ દેવશિખામણિઃ।
ગાઙ્ગેયશ્ચુબુકં પાતુ મુખં પાતુ શરોદ્ભવઃ ॥ ૧૦॥

હનૂ હરસુતઃ પાતુ કણ્ઠં કારુણ્ય-વારિધિઃ ।
સ્કન્ધાવુમાસુતઃ પાતુ બાહુલેયો ભુજ-દ્વયમ્ ॥ ૧૧॥

બાહૂ ભવેદ્ભવઃ પાતુ સ્તનૌ પાતુ મહોરગઃ ।
મધ્યં જગદ્વિભુઃ પાતુ નાભિં દ્વાદશ-લોચનઃ ॥૧૨ ॥
કટિં દ્વિષડ્ભુજઃ પાતુ ગુહ્યં ગઙ્ગાસુતોઽવતુ ।
જઘનં જાહ્નવીસૂનુઃ પૃષ્ઠભાગં પરન્તપઃ ॥ ૧૩ ॥

ઊરૂ રક્ષેદુમાપુત્રઃ જાનુયુગ્મં જગદ્ધરઃ ।
જઙ્ઘે પાતુ જગત્પૂજ્યઃ ગુલ્ફૌ પાતુ મહાબલઃ ॥ ૧૪॥

પાદૌ પાતુ પરંજ્યોતિઃ સર્વાઙ્ગં કુક્કુટદ્ધ્વજઃ ।
ઊર્ધ્વં પાતુ મહોદારઃ અધસ્તાત્પાતુ શાઙ્કરિઃ ॥ ૧૫॥

પાર્શ્વયોઃ પાતુ શત્રુઘ્નઃ સર્વદા પાતુ શાશ્વતઃ ।
પ્રાતઃ પાતુ પરં બ્રહ્મ મદ્ધ્યાહ્ને યુદ્ધકૌશલઃ ॥ ૧૬॥

અપરાહ્ને ગુહઃ પાતુ રાત્રૌ દૈત્યાન્તકોઽવતુ ।
ત્રિસન્ધ્યન્તુ ત્રિકાલજ્ઞઃ અન્તસ્થં પાત્વરિન્દમઃ ॥ ૧૭॥

બહિસ્થિતં પાતુ ખડ્ગી નિષણ્ણં કૃત્તિકાસુતઃ ।
વ્રજન્તં પ્રથમાધીશઃ તિષ્ઠન્તં પાતુ પાશભૃત્ ॥ ૧૮॥

શયને પાતુ માં શૂરઃ માર્ગે માં પાતુ શૂરજિત્ ।
ઉગ્રારણ્યે વજ્રધરઃ સદા રક્ષતુ માં વટુઃ ॥ ૧૯॥

સુબ્રહ્મણ્યસ્ય કવચં ધર્મકામાર્થમોક્ષદમ્ ।
મન્ત્રાણાં પરમં મન્ત્રં રહસ્યં સર્વદેહિનામ્ ॥ ૨૦॥

સર્વરોગપ્રશમનં સર્વવ્યાધિ  વિનાશનમ્ ।

સર્વપુણ્ય પ્રદં દિવ્યં સુભગૈશ્વર્ય વર્ધનમ્ ॥ ૨૧॥

સર્વત્ર શુભદં નિત્યં યઃ પઠેદ્વજ્રપઞ્જરમ્ ।
સુબ્રહ્મણ્યસ્સુસમ્પ્રીતો વાઞ્છિતાર્થાન્ પ્રયચ્છતિ ॥ ૨૨॥

દેહાન્તે મુક્તિમાપ્નોતિ સ્કન્દવર્માનુભાવતઃ ॥
॥ ઇતિ સ્કાન્દે અગસ્ત્ય નારદ સંવાદે શિવપ્રોક્તં
સુબ્રહ્મણ્ય કવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by N.Balasubramanian bbalu@satyam.net.in

.. shrIsubrahmaNya kavacham 2 ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*